**Jain College, Jayanagar**
**I PUC Mock Paper 2017-18**
**Subject: Sanskrit**

**Duration: 3 Hrs 15 mins** **Max.Marks: 100**

---

**I. एतेषां प्रश्नानामुत्तराणि एकैकवाक्येन संस्कृतभाषया लिखत :–** **10X1=10**

1. विश्वं कस्मात् सम्भवति ?
2. रामः कान् अविजित्य सङ्ग्रामात् न निवर्तते ?
3. कपिञ्जलः कुत्र वसति स्म ?
4. महाभारतस्य कर्ता कः ?
5. विरोचनस्य पुत्री का?
6. मेना कस्य पत्नी?
7. अलब्धं कथम् ईहेत् ?
8. ज्योदिषिकः कुत्र उपविश्य ग्राहकान् प्रतीक्षते ?
9. सेनजितः सचिवस्य नाम किम् ?
10. यमुनां किं करोमि इति दामोदरः वदति ?

**II. द्वित्रैः वाक्यैः प्रादेशिकभाषया आङ्ग्लभाषया वा उत्तरं लिखत (पञ्चानमेव)** **5X2=10**

11. विश्वस्य उत्पत्तिः कथमिति सोदाहरणं लिखत ।
12. पञ्चतन्त्राणि ।
13. सप्तर्षयः हिमवन्तं किम् अवोचन् ?
14. पुरुषस्य परं निदानम् ?
15. ज्ञानभक्त्योः अविनाभावसंबन्धं कथं अक्कमहादेवी वर्णयति ?
16. भीमसेनः आत्मानं कथं परिचाययति ?

**III. त्रयाणां श्लोकानां भाषान्तरं कृत्वा भावं विशदयत ।** **3X 3=9**

17. सिद्धो वा यदि वा देवो गन्धर्वो वाथ गुह्यकः ।
पृष्टस्सन् काम्यया ब्रूहि कस्त्वं वानररूपधृक् ॥
18. सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥
19. तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।
अशोच्या हि पितुःकन्या सद्भर्तृप्रतिपादिता ॥
20. आहारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसन्धारणार्थम् ।
प्राणाः सन्धार्यः तत्त्वविज्ञानहेतोः तत्त्वं विज्ञेयं येन भूयो न जन्म ॥
21. प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः ।
बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षच्छचीपतेः ॥
22. उत्तिष्ठ देहि मे मार्गं पश्य वा मेऽद्य पौरुषम् ।
मच्छासनमकुर्वाणं त्वां वा नेष्ये यमक्षयम् ॥

**IV. सन्दर्भं संस्कृतभाषया सूचयत (पञ्चानमेव) –** **4X2=8**

23. अहिंसैव धर्ममार्गः ।
24. बलेन तपसा लब्धे बलेत्यतिबलेति च ।
25. इदानीं तु निद्रासमयः ।
26. अहो, विभेमि भर्तः बिभेमि ।
27. आः ममेदृशी प्रज्ञा ?
28. यद्भूतयोनिं परिपश्यन्ति धीराः ।

**V. दशवाक्यैः कन्नडभाषया आंङ्ग्लभाषया वा लघुटिप्पणीः लिखत । (चतुर्णामेव )** **4X5=20**

29. रामायणस्य महत्त्वम् ।
30. भीमसेनस्य पात्रचित्रणम् ।
31. विश्वामित्रस्य विज्ञापनं तथा दशरथस्य निर्णयम् ।
32. चन्द्रधरः तथा देवव्रतस्य मैत्रीं वर्णयत ।
33. जीवविज्ञानं परिसरविज्ञानं च अधिकृत्य लघुटिप्पण्यौ लिखत ।

**VI. 34. एतासां कृतीनां कवीनां नाम सूचयत ।** **5X1=5**

1. कुमारसंभवम् 2. नैषधीयचरितम् 3. मालविकाग्निमित्रम्
4. कादम्बरी 5. किरातार्जुनीयम् ।

**35. दशवाक्यैः कन्नडभाषया आंङ्ग्लभाषया वा लघुटिप्पणीः लिखत । (एकस्य)** **1X5=5**

1. पुराणानि । 2. महाभारतम् ।

**VII. रिक्तं स्थानं पूरयत ।** **4X1=4**

36. शौनको ह वै महाशालोऽङ्गिरसं ...........................उपसन्नः पपृच्छ ॥
37. ........................... रामो नाम जनैःश्रुतः ॥
38. रुपमप्रतिमं वीर ........................... निरीक्षितुम् ॥
39. अमरशक्तेः नगरस्य नाम ........................... ॥

**VIII. 40. संयोजयत –** **6X½=3**

| | |
|---|---|
| अ. पुरुषात् | आयुर्वेदः |
| आ. रामायणऽति विख्यातः | स्वर्गः |
| इ. संकर्षणः | केशलोमानि |
| ई. जलनिधिः | हनूमान् |
| उ. आचारः | बलरामः |
| ऊ. चरकसंहिता | सागरः |

**IX. रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।** **2X1=2**

41. श्रीमहोदयस्य बाल्यं <u>श्रीरङ्गपत्तने</u> व्यतीतम् ।
42. <u>सस्यानां प्राणिनां</u> च वर्गीकरणं गुणमवलम्ब्य कृतम् ।

**X.** **(अ) द्वयोः सन्धिं विभजत–** **2X1=2**

43. जरयानघ, श्रान्तोऽसि, दृष्ट्वेदम् ।

**(आ) द्वयोः सन्धिं योजयत–** **2X1=2**

44. चलति+एव, पुनः+अपि, सम्यक्+विद्या ।

**XI.** **द्वयोः विग्रहवाक्यं लिखत–** **2X1=2**

45. ज्ञानभण्डारः, राजपुत्रः, इन्द्रद्वीपः ।

**समस्तपदं लिखत (द्वयोः)** **2X1=2**

46. चोरात् भयम्=, राष्ट्रस्य कविः=, मुखं कमलम् इव=,

**द्वयोः पदपरिचयं कुरुत ।** **2X1=2**

47. वारयितुम्, क्रीत्वा, आगम्य ।

**पर्याय शब्दानि लिखत । (द्वयोः)** **2X1=2**

48. धनदः, समुद्रः, अरण्यम् ।

**अथवा**

**विरुद्धार्थकपदं लिखत–**

आदरः, गुणः ।

**XII.** **49. संस्कृतभाषया अनुवदत ।** **3X1=3**

i) ನಾಳೆ ನನ್ನ ತಂದೆಯು ನಗರಕ್ಕೆ ಬರುವರು.
My father is coming to the city tomorrow.

ii) ದೇವರ ಅನುಗ್ರಹದಿಂದ ಮೂಕನು ಮಾತನಾಡುವನು.
Even a dumb person can speak by the grace of God.

iii) ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರಶ್ನೋತ್ತರಗಳನ್ನು ಬರೆಯುತ್ತಿದ್ದಾರೆ.
The students are writing the question and answers.

iv) ಜಗತ್ತಿಗೆ ತಾಯಿತಂದೆಗಳಾದ ಪಾರ್ವತಿಪರಮೇಶ್ವರರನ್ನು ನಮಿಸುತ್ತೇನೆ.
I prostrate Goddess Parwathi and Lord Parameshwara who the parents of The universe.

**50. कन्नाडभाषाया वा आंग्लभाषाया अनुवदत । (द्वयोः)** **4X1=4**

i) कोकिलः वसन्तकाले मधुरम् कूजति ।
ii) वयं सर्वदा सत्यं वदामः ।
iii) दुन्दुभेः शब्दः गम्भीरः भवति ।
iv) बालिका गुरुम् कथां पृच्छति ।

**51. परिच्छेदमिमं पठित्वा प्रश्नानाम् उत्तराणि लिखत । 5**

एकदा एकः नरः सरोवरतटे अभ्रमत् । सः गम्भीर–चिन्तने रतः आसीत् । सहसा वानराणां शब्दैः तस्य ध्यानभङ्गः अभवत् । स अपश्यत् यत् रक्तवर्णाः अतिविकरालवानराः नातिदूरे आसन् । सः धावितुम् आरभत । तं धावन्तं दृष्ट्वा वानराः अपि अनुधावितवन्तः, भीतः सः तीव्रगत्या धावितुम् आरभत । " मा धाव! भयं त्यक्त्वा तत्रैव स्थिरः भव" इति कस्यचित् वृद्धजनस्य उच्चस्वरं श्रुत्वा, सः तथैव अकरोत् । स्थिरं तं दृष्ट्वा वानराः अपि तत्रैव स्थितवन्तः । साहसं कृत्वा निविर्भीकदृष्ट्या सः वानरान् अपश्यत् । तं निर्भीकं दृष्ट्वा वानरसमूहः पलायितः । अहो आश्चर्यम् ! कीदृशः चमत्कारः ! अनेन अनुभवेन तस्य ज्ञानं–चक्षुषी समुन्मीलिते । तेन ज्ञातं यत् आपत्तिभ्यः मुक्तिः दृढसङ्कल्पेन, साहसेन, धैर्येण च भवति न ताभ्यः पलायनेन' । जानन्ति भवन्तः एषः नरः कः आसीत्? एषः आसीत् स्वामिविवेकानन्दः ।

***प्रश्नाः–**

१. कैः नरस्य ध्यानभङ्गः अभवत् ?
२. भीतः नरः किं कृतवान् ?
३. नरः कुत्र अभ्रमत् ?
४. नरः यदा स्थितः तदा वानराः किमकुर्वन् ?
५. आपत्तिभ्यः मुक्तिः कथं जायते ?

**❖ शुभं भूयात् ❖**